## अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च । (१४५/८८३)

विभाषा इत्येव । अग्रान्तात् शब्दात् शुद्ध शुभ्र वृष वराह इत्येतेभ्यश्च परस्य दन्तशब्दस्य विभाषा दतृ इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे । [1]कुड्मलाग्रदन्, कुड्मलाग्रदन्तः । शुद्धदन्, शुद्धदन्तः । शुभ्रदन्, शुभ्रदन्तः । वृषदन्, वृषदन्तः । वराहदन्, वराहदन्तः । अनुक्तसमुच्चयार्थः चकारः । अहिदन्, अहिदन्तः । मूषिकदन्, मूषिकदन्तः । [2]गर्दभदन्, गर्दभदन्तः । [3]शिखरदन्, शिखरदन्तः ॥

## ककुदस्यावस्थायां लोपः । (१४६/८८४)

ककुदशब्दान्तस्य बहुव्रीहेर्लोपो भवति समासान्तः अवस्थायां गम्यमानायाम् । कालादिकृता [4]वस्तुधर्मा वयःप्रभृतयः अवस्था इत्युच्यते । [5]असञ्जातं ककुदमस्य असञ्जातककुत् । बालः इत्यर्थः । पूर्णककुत् । [6]मध्यमवयाः इत्यर्थः । [7]उन्नतककुत् । [8]वृद्धवयाः इत्यर्थः । स्थूलककुत् । बलवान् इत्यर्थः । यष्टिककुत् । [9]नातिस्थूलो नातिकृशः इत्यर्थः । अवस्थायाम् इति किम् ? श्वेतककुदः ॥

## त्रिककुत् पर्वते । (१४७/८८५)

त्रिककुदि[10] बहुव्रीहौ[11] ककुदशब्दस्य लोपः समासान्तो[12] निपात्यते पर्वतेऽभिधेये । त्रीणि ककुदान्यस्य त्रिककुत् पर्वतः । ककुदाकारं पर्वतस्य शृङ्गं ककुदम्[13]इत्युच्यते । न च सर्वस्त्रिशिखरः पर्वतः त्रिककुत् । किं तर्हि ? सञ्ज्ञैषा पर्वतविशेषस्य । पर्वते इति किम् ? त्रिककुदोऽन्यः ॥

## उद्विभ्यां काकुदस्य । (१४८/८८६)

उत् वि इत्येताभ्यां [14]परस्य काकुदशब्दस्य लोपो भवति[15] बहुव्रीहौ समासे । उद्गतं काकुदमस्य उत्काकुत् । विकाकुत् । तालु काकुदमुच्यते ॥

## पूर्णाद् विभाषा । (१४९/८८७)

पूर्णात्[16] परस्य काकुदशब्दस्य विभाषा लोपो भवति[17] बहुव्रीहौ[18] समासे । पूर्णं काकुदमस्य पूर्णकाकुत् पूर्णकाकुदः[19] ॥

---

1. कुड्मलाग्रवत् दन्ता यस्य इत्यधिकम् ड. 2. चारुदन् चारुदन्तः क. 3. शिखराग्रदन् शिखराग्रदन्तः ड:. 4. देहधर्मा ब. क. 5. अजातं क. 6. मध्यमः क. ड. 7. संपन्नककुद् क. 8. वृद्धः क. फ. 9. नातिदीर्घो नातिह्रस्वः क. 10. इति इत्यधिकम् क. ड 11. समासे इत्यधिकम् ड. 12. अपि इत्यधिकम् ह. 13. इति नास्ति फ. 14. उत्तरस्य क. 15. समासान्तः इत्यधिकम् क. 16. शब्दात् इत्यधिकम् फ. 17. समासान्त- इत्यधिकम् क. ड. 18. समासे नास्ति फ. 19. पूर्णात् इति किम् ? रक्तकाकुदः इत्यधिकम् ड.